# ॥ श्रीवरवरमुनि मासमाला ॥

(ककाराद्यक्षरानुपूर्वी प्रायशः)

कलानामेष * सर्वासां निधिर्वरवरो मुनिः ।
करोतु सततं वासं कृपया मम मानसे ॥ १ ॥

खलानां दमनायैव कलयन्नुदयं भुवि ।
वरयोगीश्वरस्स्वामी वर्धतां पुरुषर्षभः ॥ २ ॥

* मेषराश्यादिनिर्देशः क्रमेण द्रष्टव्यः ।

गतिरेष फणीन्द्रो नः यो दिव्यमिथुनाज्ञया ।
रम्यजामातृयोगीन्द्ररूपी रक्षितवान् भुवम् ॥ ३ ॥

चरन्तु वक्रगतयः ¶ कर्कटा इव केचन ।
कान्तोपयन्तृभक्तानामार्जवं भुवि विश्रुतम् ॥ ४ ॥

जन्ममृत्युजराव्याधिभीतिग्रस्ता नरा इह ।
श्रीरम्ययोगिसिंहस्य करुणामेव वृण्वताम् ॥ ५ ॥

झरीं कवेरकन्याया अपि मन्दयितुं क्षमैः ।
सूक्तिवृन्दैः पुनन् भूमिं वरयोगी विजृम्भताम् ॥ ६ ॥

तनोतु वरयोगीन्द्रः करुणामतुलां मयि ।
आचार्यहृदयार्थानामवबोधनसिद्धये ॥ ७ ॥

दारुणा वृश्चिकप्राया ये भुवं क्षोभयन्ति ते ।
कान्तोपयन्तृयोगीन्द्रसूक्तिभिर्यान्तु शिक्षणम् ॥ ८ ॥

धनुषा भगवान् शत्रून् विजिगाय किमद्भुतम् ।
गुरुर्वरवरो रम्यैः गुणैरेवाजयन्महीम् ॥ ९ ॥

परं धामकरग्राह्यं कर्तुं व्यवसितो हरिः ।
श्रीरम्यवरयोगीन्द्रमवातीतरदादरात् ॥ १० ॥

भगवान् कुम्भसम्भूतिः पाराशर्यः पराशरः ।
इत्यादिभ्यो मुनिभ्योऽपि श्रेयान्वरवरो मुनिः ॥ ११ ॥

---

¶ कर्कटे कुटिला गतिः ।

ये पठन्ति महायोगिमासमालामिमां मुदा ।
अमी न जातुचिद्दुःखम् अवाप्स्यन्ति मनागपि ॥ १२ ॥

---